**आभूति** स्त्री आ+भू-क्तिन्। व्याप्तौ "आभूतिरेषा भूतिः" ऐ० उ०

**आभेरी** स्त्री रागिणीभेदे हलायुधः।

**आभोग** पु० आ+भुज–आधारे घञ्। परिपूर्णतायां, यस्य यावदपेक्षितं रूपं तत्पूर्णत्वे हि आभोगाधारतेति तस्य तथात्वम्। "अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्येति" शकु० "पर्व्वताभोगवर्ष्माण-मतिकायं महाबलम्" भा०व० १७८ अ० "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः आभोगवत्पर्वततुल्यदेहमित्यर्थः। "यत्नैव कविनाम स्यात् स आभोग इतीरितः" इति सङ्गीतदामोदरोक्ते गानसमाप्तौ (भणिता) ख्याते २कविनामख्यापने। आभुज्यतेऽनेन करणे घञ्। ३यत्ने यत्नादिनैव हि भोगः सम्यग् सम्पद्यते इति यत्नस्य तथात्वम्। "ना सुखोऽयं नवाभोगोधरणिस्योहि राजसः" किरा० "नवाभोगः अभिनवोत्साहः" मल्लि० सम्यक् भोगः प्रा०स०। ४सम्यक्सुखाद्यनुभवे "विषयाभोगेषु नैवादरः" शान्तिशतकम्। ५वरुणस्य छत्ने च मेदि०।

**आभोगय** त्रि० आभोगं याति या–क। आपूर्णे "आभोगयं प्रयदिच्छन्त ऐतनापाकाः प्राञ्चो मम केचिदापयः" ऋ० १,११०,२।

**आभोगि** त्रि० आभोगं करोति आभोग+णिच्-इन्। विषयाभोगकारके "जिह्मश्ये चरितवे मघोन्याभोगय इष्टये" ऋ० १,११३,५।

**आभोगिन्** त्रि०आभोगोऽस्त्यस्य इनि। परिपूर्णे स्त्रियां ङीप्

**आभ्यन्तर** त्रि० अभ्यन्तरे भवः अण्। मध्यवर्त्तिनि "कच्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशास्पते!" भा०स०प० ५अ०। "वर्णोच्चारणे, प्रयत्नो द्विधा आभ्यन्तरोबाह्यश्च आद्यश्चतुर्द्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम् विवृतमूष्मणां स्वराणाञ्च ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायान्तु विवृतमेव" सि०कौ०। "एतेषाञ्चाभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात् "तथा हि नाभिप्रदेशात् प्रयत्नविशेषप्रेरितः प्राणवायुः ऊर्द्ध्वमाक्रामन् उरःप्रभृतीनि स्थानान्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वोत्पत्तिः तत्नोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि वर्णोत्पत्तिस्थानं ताल्वादि यदा सम्यक् स्पृशन्ति तदा स्पृष्टता, ईषत्स्पर्शे ईषत्स्पृष्टता, समीपावस्थाने संवृतता, दूरावस्थाने विवृतता। अतएव इचुयशानां तालव्यत्वाविशेषेऽपि चवर्गे उच्चारयितव्ये जिह्वाग्रस्य तालुस्थानेन सम्यक्स्पर्शः, यकारे ईषत्स्पर्शः, शकारे, समीपेऽवस्थानम् इवर्णे तु दूरेऽवस्थानम्" मत्कृतसरला।

**आभ्यवहारिक** त्रि० अभ्यवहाराय हितं ठक्। भोजनयोग्ये अन्नादौ। [ठक्। कुटुम्बभरणव्यापृते हेम०।

**आभ्यागारिक** त्रि० अभ्यागारे तत्स्थकुटुम्बाभरणे व्यापृतः

**आभ्यादायिक** न० आभिमुख्येनादानमभ्यादानं तत्र नियुक्तः ठक्। पितृमातृकुलादिप्राप्ते स्त्रीधनभेदे।

**आभ्यासिक** त्रि० अभ्यासे निकटे भवः ठक्। १निकटस्थिते "अल्पैश्चाभ्यासिकैर्युक्तां शुशुभे योधरक्षितम्" भा०आ०२७६ अ०। अभ्यासात् पौनःपुन्यात् आगतः ठक्। २अभ्यासप्राप्ते दृढ़संस्कारादौ।

**आभ्युदयिक** न० अभ्युदयः प्रयोजनमस्य ठक्। २वृद्धिनिमित्ते श्राद्धभेदे तत्र छन्दोगानामाभ्युयिकश्राद्धविधिर्गोभिलसूत्रछन्दोगपरिशिष्टयोरुक्तः यथा।

गोभिलः। "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्। प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः सम्पन्नमिति तृप्तिप्रश्नः दधिबदराक्षतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तां, न स्वधाञ्च प्रयुञ्जीत" इति। "आभ्युदयिके अभ्युदयनिमित्तके अभ्युदय इष्टलाभः विवाहादिः तदर्थं श्राद्धं आभ्युदयिकम्। तच्च भूतभविष्यद्भेदेन द्विविधं तत्र भूतं पुत्रजन्मादि भविष्यद्विवाहादि एवञ्च श्राद्धविवेकादौ श्राद्धभेदगणने वृद्धिश्राद्धत्वेन कर्म्माङ्गत्वेन च यदुभयत्वमुक्तं तदुभयमेवाभ्युदयिकत्वेनोपपन्नं तेनाभिलापे आभ्युदयिकश्राद्धमिति प्रयोज्यम्। तत्र यवैस्तिलार्थइत्यनेन पार्वणश्राद्धप्राप्ततिलस्थाने यवविधानादाभ्युदयिकस्यापि पार्व्वणप्रकृतिकत्वं प्रतीयते। अन्यथा तिलार्थइत्युपादानं व्यर्थं स्यात्। ततश्च पार्वणप्रकृतिकत्वेन पितृपक्षेऽयुग्मब्राह्मणप्राप्तौ तन्निरासाय पितृपक्षे ब्राह्मणयुग्मत्वोपदेशः। दैवे युग्मत्वस्य पार्व्वणत्वेन प्राप्तत्वान्न तदर्थोपदेशः "अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्" इति याज्ञवल्क्यवचनेन देवकर्म्मानन्तरं पितृकर्म्मकरणे प्राप्तवामोपचारनिरासाय प्रदक्षिणमुपचारस्तेन दैवपितृकर्म्मकरणाय दक्षिणावर्त्तेन गन्तव्यम्। द्विगुणभुग्नत्वनिरासाय ऋजवोदर्भा इति ऋजुत्वोपदेशः। तृप्ताः स्थ इत्यनेन तृप्तिप्रश्ने सम्पन्नमिति प्रष्टव्यं योगरूत्वात् सम्पन्नमिति प्राप्ते वक्ष्यमाणच्छन्दोगपरिशिष्टवचनाच्च सुसम्पन्नमित्यु-